# Celebration of Independence Day in SSSU Campus (15/08/2019)

73rd Independence Day was celebrated in Shree Somnath Sanskrit UniversityOn 15th**August 2019 The Hon'ble Vice**-Chancellor hoisted the Flag **and later everyone performed the National Anthem.Hon'ble Prime Minister** ShriNarendraModiremovedArticle370and35AfromJammuandKashmir **With the aim of "One Nation One Constitution", was praised by Hon'ble Vice**-Chancellor, Prof. Gopabandhu Mishra.



अप्रैल-सितम्बर २०१९ 06 सोमज्योतिः (संयुक्ताङ्कः - २०-२१)

## ७३ तमं स्वातन्त्र्यपर्व समाचरितं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे

प्रतिवर्षमिव ऐषमः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १५ ऑगस्त २०१९ दिनाङ्के स्वतन्त्रतादिवसस्य भव्यतया आयोजनम् अक्रियत। विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः ध्वजोत्तोलनम् अकरोत् तदनु सर्वैः मिलित्वा राष्ट्रगानमगीयत। प्रसङ्गेऽस्मिन् स्वीयोद्बोधने प्रो. गोपबन्धुमिश्रवर्यः अवादीत् यत् अस्मिन् वर्षे स्वातन्त्र्यपर्वणः एतद्वैषिष्ट्यमस्ति यत् अस्माकं राष्ट्रं भारतस्य अखण्डताविषये एकीभूय समागतमस्ति। भारतस्य अखण्डतारक्षणे "एकं राष्ट्रम् एकं संविधानम्" इति लक्ष्यमुररीकृत्य जम्मूकाश्मीरराज्यात् धारा ३७० किञ्च ३५A इत्यस्य अपसारणार्थं माननीयप्रधानमन्त्रिणः श्रीनरेन्द्रमोदिवर्यस्य सर्वकारः भूयो भूयः अभिनन्द्यते। अस्माकं पूर्वजैः हुतात्मभिश्च भारतस्य स्वातन्त्र्यं तु अवाप्तम्, परमिदानीम् एतस्य स्वातन्त्र्यस्य रक्षणस्य दायित्वम् अस्माकं वर्तते। अस्माभिः स्वकर्तव्यपालनपूर्वकं राष्ट्रभक्तिः प्रदर्शनीया। इयं राष्ट्रभक्तिः अस्माभिः अनुशासनपालनेन, स्वकर्तव्यपालनेन, जलसञ्चयेन, विद्युत्संरक्षणेन इत्यादिभिः नानाभिः उपायैः कर्तुं शक्यते।

स्वातन्त्र्यपर्वणि उद्बोधनं विदधानः कुलपतिः प्रो. गोपबन्धुमिश्रः

कार्यक्रमे उपस्थिताः अध्यापकाः छात्राश्च

अस्मिन् स्वातन्त्र्यदिवससमाचरणकार्यक्रमे विश्वविद्यालयस्य छात्रैः देशभक्तिगीतानि, देशभक्तिभाषणानि, देशभक्तिकाव्यानि च मनोहारिरीत्या प्रस्तुतानि। अस्मिन् कार्यक्रमे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अन्ये सहायकाचार्याः, शिक्षणेतराधिकारिणः कर्मचारिणः, छात्राश्च समुपातिष्ठन्। अस्य कार्यक्रमस्य मार्गदर्शनं डॉ. नरेन्द्रकुमारपण्ड्या किञ्च मञ्चसञ्चालनं डॉ जयेशमुङ्गरा अकरोत्।

७३तमस्य स्वातन्त्र्यपर्वणः किञ्चन दृश्यम्

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, page no. 06)